# कक्ष्या - IX

प्रश्नसञ्चयः अक्कादमिक - संस्कृतविद्यालयानां कृते (Part I)

# एककम् - ३ प्रकृतेः दशाद्वयम्

# पाठः ६ वर्षावर्णना

## 1. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः - 1**

| | *अ* | *आ* |
|---|---|---|
| 1. | नद्यः | नृत्यन्ति |
| 2. | घनाः | नदन्ति |
| 3. | शिखिनः | वर्षन्ति |
| 4. | मत्तगजाः | वहन्ति |
| | | भान्ति। |

**पाठ्यचर्योद्देश्यम्।**

आशयान् अवगच्छति।

**मानसिकव्यापारः**

स्मरणं, विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** एकैकस्य उत्तरस्य एकैकोऽङ्कः। आहत्य चत्वारः अङ्काः।

नद्यः वहन्ति

घनाः वर्षन्ति

| | |
|---|---|
| शिखिनः | नृत्यन्ति |
| मत्तगजाः | नदन्ति |

## 2. प्रश्ननिर्देशः।

श्लोकं पठित्वा अधोदत्तप्रश्नानामुत्तराणि लिखत।

## प्रश्नपाठः - 2

क्वचित् प्रकाशं क्वचिदप्रकाशं
नभः प्रकीर्णाम्बुधरं विभाति।
क्वचित् क्वचित् पर्वतसन्निरुद्धं
रूपं यथा शान्तमहार्णवस्य।।

1. श्लोके प्रयुक्तम् आकाशमित्यर्थकं पदं लिखत?
2. तदवगम्य - तत् + अवगम्य एवं चेत् क्वचिदप्रकाशम् इति पदं विश्लेषयत।
3. नभः कीदृशं विभाति?

## पाठ्यचर्योद्देश्यम्।

श्लोकानामाशयावगमनम्।

## मानसिकव्यापारः

अपग्रथनं, नूतनसन्दर्भे प्रयोगः, उत्तरनिर्णयः।

समयः - 6 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः**
1. नभः।
2. क्वचित् + अप्रकाशम्।
3. क्वचित् प्रकाशं क्वचिदप्रकाशं विभाति।

## 3. प्रश्ननिर्देशः।

श्लोकस्य गद्यक्रमं लिखत।

## प्रश्नपाठः - 3

नवमासघृतं गर्भं भास्करस्य गभस्तिभिः।
पीत्वा रसं समुद्राणां द्यौः प्रसूते रसायनम्।।

द्यौः ........... गभस्तिभिः समुद्राणां ........... पीत्वा नवमासघृतं ........... गर्भं ........... प्रसूते।

**पाठ्यचर्योद्देश्यम्।**

आशयमवगम्य गद्यक्रमलेखनम्।

**मानसिकव्यापारः**

अपग्रथनं, क्रमीकरणम्।

समयः - 6 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** उचितरीत्या लेखनस्य द्वावङ्कौ।

**उत्तर् -** अन्वयक्रमः एवं - द्यौः भास्करस्य गभस्तिभिः समुद्राणां रसं पीत्वा नवमासधृतं गर्भं रसायनं प्रसूते।

## 4. प्रश्ननिर्देशः।

श्लोकस्याशयं लिखत।

**प्रश्नपाठः - 4**

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवंगमाः।।

**पाठ्यचर्योद्देश्यम्।**

श्लोकानामाशयमवगम्य लेखनम्।

**मानसिकव्यापारः**

अपग्रथनम्, आमुखम्, अवतरणम्।

समयः - 6 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| आशयपूर्णतायै | - | 2 |
| क्रमबद्धलेखनाय | - | 1 |
| **आहत्य** | **-** | **3** |

**उत्तरम् -** वर्षाकाले नद्यः जलाधिक्येन प्रवहन्ति, मेधाः वर्षन्ति, मत्तगजाः गर्जन्ति। वनप्रदेशाः प्रकाशन्ते, प्रियाविहीनाः विरहचिन्तामग्नाः निश्चलाः भवन्ति, मयूराः नृत्यन्ति, भेकाः समाश्वासमनुभवन्ति।

## 5. प्रश्ननिर्देशः।

श्लोकं पठित्वा अधोदत्तानां प्रश्नानामुत्तराणि लिखत।

**प्रश्नपाठः - 5**

समुद्वहन्तः सलिलातिभारं
बलाकिनो वारिधरा नदन्तः।
महत्सु शृङ्गेषु महीधराणां
विश्रम्य विश्रम्य पुनः प्रयान्ति।।

1. गर्जन्तः इत्यस्य समानार्थकं पदं चित्वा लिखतु?
2. श्लोकस्याशयं लिखत।

### पाठ्यचर्योद्देश्यम्।

श्लोकानामाशयावगमनम्।

### मानसिकव्यापारः

अपग्रथनम्।

समयः - 8 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः** प्रथमोत्तरस्य एकः अङ्कः। द्वितीयस्य द्वावङ्कौ।

1. नदन्तः
2. मेघाः जलानाम् अतिभारं वहन्तः गच्छन्ति। बलाकापक्षिसहिताः ते ध्वनिं कुर्वन्तः पर्वतानां बृहत्सु शिखरेषु अन्तरान्तरा विश्रम्य विश्रम्य पुनः गच्छन्ति।

## 6. प्रश्ननिर्देशः।

श्लोकं पठित्वा आशयमवगच्छति।

**प्रश्नपाठः - 6**

अधोदत्तश्लोकं पठित्वा आशयं लिखत -

व्यामिश्रितं सर्जकदम्बपुष्पैः
नवं जलं पर्वतधातुताम्रम्।
मयूरकेकाभिरनुप्रयातं
शैलापगाः शीघ्रतरं वहन्ति।।

**पाठ्यचर्योद्देश्यम्।**

श्लोकानामाशयावगमनम्।

**मानसिकव्यापारः**

अपग्रथनं, स्मरणम्।

समयः - 6 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** समीचीनस्य लेखनस्य पूर्णाङ्कः।

**उत्तरम् -** वर्षाकाले पर्वतनदीनां जलं नवं भवति। सालकदम्बपुष्पैः मिश्रितं, गिरिधातुभिः अरुणाभं मयूराणां शब्दैः युक्तं च तादृशं जलं पर्वतनद्यः जवेन नयन्ति।

**7. प्रश्ननिर्देशः।**

श्लोकं पठित्वा आशयमवगच्छति।

**प्रश्नपाठः - 7**

वर्षावर्णना इति पाठभागे वर्णितः ऋतुः कः?

**पाठ्यचर्योद्देश्यम्।**

श्लोकानामाशयावगमनम्।

**मानसिकव्यापारः**

अपग्रथनं, स्मरणम्।

समयः - 6 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य कृते एकः अङ्कः।

**उत्तरम् -** वर्षर्त्तुः इति लिखितं चेत् एकः अङ्कः।

## 8. प्रश्ननिर्देशः।

श्लोकं पठित्वा आशयमवगच्छति।

**प्रश्नपाठः - 8**

वर्षावर्णना इति पाठभागः कस्मात् ग्रन्थात् उद्धृतः भवति?

**पाठ्यचर्योद्देश्यम्।**

इतिहासकाव्यं परिचिनोति।

**मानसिकव्यापारः**

स्मरणम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य कृते एकः अङ्कः।

**उत्तरम् -** रामायणम्।

# पाठः ७ निलाविलापः

## 1. प्रश्ननिर्देशः।

उदाहरणमनुसृत्य एकं पदं लिखत।

**प्रश्नपाठः - 1**

पर्वतस्य नन्दिनी पर्वतनन्दिनी। एवं चेत्।

सह्यस्य नन्दिनी .................................?

**पाठ्यचर्योद्देश्यम्।**

समस्तपदं परिचिनोति।

**मानसिकव्यापारः**

अपग्रथनं, तुलनम्, आशयग्रहणम्।

समयः - 1 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य पूर्णाङ्कः।

**उत्तरम् -** सह्यनन्दिनी।

## 2. प्रश्ननिर्देशः।

जलाशयानां शोच्यावस्थायाः परिहारार्थम् अधिकारिणं प्रति निवेदनमेकं सूचनानुसारं लिखतु।

**प्रश्नपाठः - 2**

सूचनाः - सिकतापहरणं, जलस्य दुरुपयोगं, कृषकैः वणिग्भिः च सेतुबन्धनं, पलास्तिकादि मालिन्यानां निक्षेपणम्।

**पाठ्यचर्योद्देश्यम्।**

उचितसङ्केतानुसारं निवेदनलेखनसामर्थ्यं सम्पादयति।

**मानसिकव्यापारः**

आशयापग्रथनं, क्रमबद्धलेखनम्।

समयः - 10 निमेषाः

अङ्काः - 5

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | सूचनास्वीकाराय | - | 2 |
| | क्रमीकृतलेखनाय | - | 2 |
| | निवेदनस्वरूपाय | - | 1 |
| | **आहत्य** | **-** | **5** |

## 3. प्रश्ननिर्देशः।

सूचनानुसारं कस्यचन जलाशयस्य आत्मकथां लिखतु।

**प्रश्नपाठः - 3**

सूचनाः - कार्षिकव्यावसायिकमण्डलेषु आधिपत्यं, केदारसेचनं, वृक्षलतादीनां पोषणं, इदानीं मालिन्यानां निक्षेपणं, सिकतापहरणं, सेतुबन्धनेन प्रवाहानां गतिनिरुद्धः।

**पाठ्यचर्योद्देश्यम्।**

उपन्यासलेखननैपुणीसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनं, निर्देशानुसारं क्रमबद्धलेखनम्।

समयः - 10 निमेषाः

अङ्काः - 5

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | सूचनास्वीकाराय | - | 2 |
| | उपन्यासघटनायै | - | 1 |
| | आशयपूर्णतायै | - | 2 |
| | **आहत्य** | **-** | **5** |

**4. प्रश्ननिर्देशः।**

गणे किं नान्तर्भवति।

**प्रश्नपाठः - 4**

आस्वाद्य, आरभ्य, प्रवाहस्य।

**पाठ्यचर्योद्देश्यम्।**

अव्ययानां परिचयसम्पादनम्।

**मानसिकव्यापारः**

स्मरणं, विवेचनं च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य पूर्णोऽङ्कः।

**उत्तरम् -** प्रवाहस्य।

## 5. प्रश्ननिर्देशः।

प्रादेशिकभाषायां विवर्तयत।

**प्रश्नपाठः - 5**

परिस्थितिमलिनीकरणम् एव इदानीन्तनसमस्या। गृहेषु मालिन्यसंस्करणाय जैववातकसन्यन्त्रः (Biogas plant) स्थापयितुं शक्यते। महानसे सञ्जायमानानां भक्ष्यावशिष्टानां शाकावशिष्टानां च एतादृशरीत्या संस्करणं कर्तुं शक्यते। तद्वारा दैनन्दिनोपयोगाय आवश्यकस्य पाचकवातकस्य उत्पादनं साध्यते। अनेन इन्धनदौर्लभ्यमपि परिहरामः।

**पाठ्यचर्योद्देश्यम्।**

गद्यांशं पठित्वा भाषान्तरीकरणसामर्थ्यम्।

**मानसिकव्यापारः**

अपग्रथनं, तुलनं, क्रमबद्धावतारणम्।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य वाक्यस्य एकैकोऽङ्कः।

## 6. प्रश्ननिर्देशः, प्रश्नपाठश्च।

जलसंरक्षणम् इति विषयमधिकृत्य भित्तिपत्रमेकं रचयतु।

**पाठ्यचर्योद्देश्यम्।**

उपन्यासान् पठित्वा आशयम् अवगच्छति।

**मानसिकव्यापारः**

आशयावगमनं, क्रमीकृत्य लेखनम्।

समयः - 5 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य कृते पूर्णः अङ्कः।

# एककम् - ४ आरोग्यतन्त्रम्

## पाठः ८ रसायनविधयः

### 1. प्रश्ननिर्देशः, प्रश्नपाठश्च।

यथोचितं योजयत।

| | *अ* | *आ* |
|---|---|---|
| 1. | अश्वगन्धा | बुद्धिवर्धकम् |
| 2. | कृष्णतिलम् | यौवनम् |
| 3. | वचा | दीर्घायुः |
| 4. | पुनर्नवा | गात्रपुष्टिः |
| 5. | मण्डूकपर्णी | ज्वरचिकित्सा |
| | | दन्तदृढता |

### पाठ्यचर्योद्देश्यम्।

ओषधीनां प्रयोगविशेषं परिचिनोति।

### मानसिकव्यापारः

अपग्रथनं, विवेचनं च।

समयः - 5 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** उचितस्य योजनस्य एकैकोऽङ्कः।

| | | |
|---|---|---|
| 1. | अश्वगन्धा | गात्रपुष्टिः |
| 2. | कृष्णतिलम् | दन्तदृढता |
| 3. | वचा | बुद्धिवर्धकम् |
| 4. | पुनर्नवा | यौवनम् |
| 5. | मण्डूकपर्णी | दीर्घायुः |

## 2. प्रश्ननिर्देशः, प्रश्नपाठश्च।

अधो दत्तेभ्यः श्लोकेभ्यः कृष्णतिलसेवया 'दन्तान् दृढीकुरु' इति मुद्रागीतस्य प्रतिपादकं श्लोकं विविच्य लिखतु।

मासं वचामप्युपसेवमानः
क्षीरेण तैलेन घृतेन वापि।
भवन्ति रक्षोभिरधृष्यरूपा
मेधाविनो निर्मलमृष्टवाक्याः।।

दिने दिने कृष्णतिलप्रकुञ्चं
समश्नतां शीतजलानुपानम्।
पोषः शरीरस्य भवत्यनल्पो
दृढीभवन्त्यामरणाच्च दन्ताः।।

### पाठ्यचर्योद्देश्यम्।

श्लोकं पठित्वा आशयमवगच्छति।

### मानसिकव्यापारः

आशयापग्रथनं, विवेचनं च।

समयः - 3 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** उचितश्लोकस्य लेखनाय द्वावङ्कौ।

## 3. प्रश्ननिर्देशः।

श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।

### प्रश्नपाठः - 3

पीताश्वगन्धा पयसार्धमासं
घृतेन तैलेन सुखाम्बुना वा।
कृशस्य पुष्टिं वपुषो विधत्ते
बालस्य सस्यस्य यथा सुवृष्टिः।।

1. जलम् इत्यस्य समानार्थकं पदं श्लोकात् चित्वा लिखतु।

2. शरीरपुष्ट्यर्थम् अश्वगन्धा कथं सेवनीया ?

3. पयसार्धमासम् इत्यस्य पदच्छेदं लिखत ?

**पाठ्यचर्योद्देश्यम् ।**

श्लोकं पठित्वा आशयम् अवगच्छति।

**मानसिकव्यापारः**

अपग्रथनं, विवेचनम्।

समयः - 6 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः** एकैकस्य उत्तरस्य एकैकोऽङ्कः।

**उत्तरम् -**

1. अम्बु।
2. अश्वगन्धा पयसा समं, घृतेन समं, तैलेन साकं सुखाम्बुना सह वा सेवनीया।
3. पयसा + अर्धमासम्।

## 4. प्रश्ननिर्देशः ।

सम्भाषणांशान् पूरयतु।

**प्रश्नपाठः - 4**

छात्रः - नमस्ते!

वैद्यः - आगच्छतु, ............................?

छात्रः - अहम् एकस्य औषधसस्यस्य प्रयोजनं ज्ञातुम् इच्छामि।

वैद्यः - ............................।

छात्रः - अश्वगन्धायाः।

वैद्यः - अश्वगन्धायाः सेवनेन ............................ सञ्जायते।

छात्रः - धन्यवादः।

**पाठ्यचर्योद्देश्यम् ।**

औषधीनां प्रयोगविशेषं परिचिनोति। सम्भाषणरचनानैपुणीं सम्पादयति।

**मानसिकव्यापारः**

अपग्रथनं, स्मरणम्।

समयः - 6 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः** उचितस्य सम्भाषणांशस्य एकैकोऽङ्कः।

**उत्तरम् -** 1. किम् आवश्यकम्?

2. कस्य औषधसस्यस्य?

3. शरीरपुष्टिः।

# पाठः ९ प्राणायामः

## 1. प्रश्ननिर्देशः।

अधो दत्तेभ्यः बाह्यवायून्, आन्तरवायून् च विविच्य पट्टिकारूपेण लिखत।

**प्रश्नपाठः - 1**

प्राणः, अपानः, नागः, कुर्मः, उदानः, कृकलः, देवदत्तः, समानः, व्यानः, धनञ्जयः।

**पाठ्यचर्योद्देश्यम्।**

प्राणायाममधिकृत्य सामान्यज्ञानम्।

**मानसिकव्यापारः**

स्मरणं, विवेचनं च।

समयः - 5 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| *आन्तरिकवायवः* | *बाह्यवायवः* |
|---|---|
| प्राणः, अपानः, उदानः, | नागः, कुर्मः, कृकलः |
| समानः, व्यानः | देवदत्तः, धनञ्जयः। |

## 2. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः - 2**

| अ | आ |
|---|---|
| पतञ्जलिः | अष्टाङ्गहृदयम् |
| वाग्भटः | घेरण्डसंहिता |
| सुश्रुतः | योगसूत्रम् |
| घेरण्डः | सुश्रुतसंहिता |
| | चरकसंहिता। |

## पाठ्यचर्योद्देश्यम्।

आरोग्यशास्त्रप्रतिपादकग्रन्थानां परिचायनम्।

## मानसिकव्यापारः

अपग्रथनं, विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** एकैकस्य एकैकोऽङ्कः।

| | |
|---|---|
| पतञ्जलिः | योगसूत्रम् |
| वाग्भटः | अष्टाङ्गहृदयम् |
| सुश्रुतः | सुश्रुतसंहिता |
| घेरण्डः | घेरण्डसंहिता। |

## 3. प्रश्ननिर्देशः।

खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत।

**प्रश्नपाठः - 3**

योगस्य अष्टांगानि सन्ति। तेष्वन्यतमः प्राणायामः। पुरकं, कुम्भकं, रेचकमिति, प्राणायामस्य अंशत्रयमस्ति। तत्र पुरकं नाम एकैकेन नासिकाद्वारेण वायोः अन्तःप्रवेशनम्। रेचकं नाम वायोः बहिर्निस्सारणम्। अन्तःस्थितवायोः अन्तरेव स्थापनम् अन्तकुम्भकम्। बहिरेव स्थापनं बहिःकुम्भकम्। मनसः एकाग्रतासिद्धिः, रक्तशुद्धिः, रक्तप्रवाहस्य क्रमीकरणं, श्वासकोशस्य हृदयस्य च अरोगता इत्येवमादीनि प्राणायामस्य प्रयोजनानि।

1. योगस्य कति अंगानि सन्ति ?

2. प्राणायामस्य अंशत्रयं किम् ?

3. पूरकं नाम किम् ?

4. प्राणायामस्य त्रीणि प्रयोजनानि लिखत ?

**पाठ्यचर्योद्देश्यम् ।**

गद्यं पठित्वा आशयम् अवगच्छति।

**मानसिकव्यापारः**

अपग्रथनम्, आशयावबोधः, विवेचनम्।

समयः - 10 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** एकैकस्य प्रश्नस्य एकैकोऽङ्कः।

आहत्य चत्वारः अङ्काः।

## 4. प्रश्ननिर्देशः ।

कः गणे न अन्तर्भवति इति विविच्य लिखतु।

**प्रश्नपाठः - 4**

पूरकम्, आसनं, रेचकम्।

**पाठ्यचर्योद्देश्यम् ।**

प्राणायाममधिकृत्य ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

स्मरणं, विवेचनं च।

समयः - 2 निमेषौ

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** समीचीनस्य उत्तरस्य एकः अङ्कः।

**उत्तरम् -** आसनम्।

**5. प्रश्ननिर्देशः।**

कोष्ठकात् समुचितमुत्तरं चित्वा लिखतु।

**प्रश्नपाठः - 5**

योगसूत्रस्य कर्ता कः ? (पतञ्जलिः, वाग्भटः, पाणिनिः)

**पाठ्यचर्योद्देश्यम्।**

प्राणायाममधिकृत्य ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

स्मरणं, चयनं च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य पूर्णाङ्कः।

**उत्तरम् -** पतञ्जलिः।

**6. प्रश्ननिर्देशः।**

यथोचितं योजयत।

**प्रश्नपाठः - 6**

| | |
|---|---|
| समानः | योगशास्त्रग्रन्थः |
| पूरकम् | योगाङ्गम् |
| घेरण्डसंहिता | पतञ्जलिः |
| प्राणायामः | नाभिदेशे |
| | वायोः अन्तप्रवेशनम् |

**पाठ्यचर्योद्देश्यम्।**

प्राणायाममधिकृत्य ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

स्मरणं, विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** एकैकस्य एकैकोऽङ्कः।

| | |
|---|---|
| समानः | नाभिदेशे |
| पूरकम् | वायोः अन्तःप्रवेशनम् |
| घेरण्डसंहिता | योगशास्त्रग्रन्थः |
| प्राणायामः | योगाङ्गम् |

## 7. प्रश्ननिर्देशः।

खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।

**प्रश्नपाठः - 7**

योगशास्त्रप्रतिपादकः कश्चन ग्रन्थोऽस्ति घेरण्डसंहिता। तत्र प्राणायामप्रकरणे आन्तरिकवायून् अधिकृत्य विवृणोति। पञ्चप्राणेषु प्राणः हृद्देशे तिष्ठति। अपानस्य स्थानोऽस्ति गुदमण्डलम्। तद्विपरीतोऽस्ति उदानः। स तु कण्ठमध्ये संस्थितोऽस्ति। व्यानः शरीरं व्याप्य, समानः नाभिदेशे च तिष्ठति।

अ. घेरण्डसंहितायाम् आन्तरिकवायून् अधिकृत्य कुत्र वर्णयति?

आ. कण्ठमध्ये संस्थितः वायुः कः?

इ. खण्डिकातः कमप्येकं ल्यबन्तमव्ययं चित्वा लिखत।

**पाठ्यचर्योद्देश्यम्।**

प्राणायाममधिकृत्य ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनम्, आशयग्रहणं, स्मरणम्।

समयः - 8 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः** अ. प्राणायामप्रकरणे।

आ. उदानः।

इ. अधिकृत्य, व्याप्य।

## 8. प्रश्ननिर्देशः।

उदाहरणानुसारं पूरयत।

**प्रश्नपाठः - 8**

उदाः - बहिरेव - बहिः + एव। एवं चेत्

अन्तरेव - ..............................

**पाठ्यचर्योद्देश्यम्।**

पदानि सन्धातुं विघटयितुं च जानाति।

**मानसिकव्यापारः**

अपग्रथनं, निर्णयः।

समयः - 2 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य पूर्णाङ्कः।

**उत्तरम् -** अन्तः + एव।

**9. प्रश्ननिर्देशः।**

अधोदत्तेभ्यः वर्त्तमानकालक्रियापदानि भूतकालक्रियापदानि च विविच्य पट्टिकारूपेण लिखतु।

**प्रश्नपाठः - 9**

वसति, अवदत्, पठसि, अलिखन्, नृत्यन्ति, अगायम्, अक्रीडत, रोदिति।

**पाठ्यचर्योद्देश्यम्।**

क्रियापदानां ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनं, चयनम्।

समयः - 8 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** उचितस्य एकस्य उत्तरस्य अर्धाङ्कः। आहत्य चत्वारः अङ्काः।

**उत्तरम् -**

| ***लट्*** | ***लङ्*** |
|---|---|
| वसति | अवदत् |

| | |
|---|---|
| पठसि | अलिखन् |
| नृत्यन्ति | अक्रीडत |
| रोदिति | अगायम् |

## 10. प्रश्ननिर्देशः।

कोष्ठकात् समुचितमुत्तरं चित्वा लिखतु।

**प्रश्नपाठः - 10**

प्राणायामः कथमाचरेत्? (वृक्षासनस्थः, शवासनस्थः, पद्मासनस्थः)

**पाठ्यचर्योद्देश्यम्।**

प्राणायाममधिकृत्य ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनं, चयनं च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य पूर्णाङ्कः।

**उत्तरम् -** पद्मासनस्थः।

# एककम् - ५ भारतीयमहिला

# पाठः १० सीतादर्शनम्

## 1. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः - 1**

| | *अ* | *आ* |
|---|---|---|
| 1. | मैथिली | भवभूतिः |
| 2. | चम्पूरामायणम् | हनुमान् |
| 3. | मारुतिः | सीता |
| 4. | त्रिजटा | भोजराजः |
| | | राक्षसी। |

**पाठ्यचर्योद्देश्यम्।**

चम्पूकाव्यं परिचिनोति।

**मानसिकव्यापारः**

स्मरणं, विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः**

| | |
|---|---|
| मैथिली | सीता |
| चम्पूरामायणम् | भोजराजः |
| मारुतिः | हनुमान् |
| त्रिजटा | राक्षसी। |

## 2. प्रश्ननिर्देशः।

उदाहरणं पठित्वा प्रश्नस्य उत्तरलेखनम्।

**प्रश्नपाठः - 2**

उदाहरणानुसारं रिक्तस्थानं पूरयत।

उदाः - अञ्जनायाः अपत्यं पुमान् - आञ्जनेयः।

सुमित्रायाः अपत्यं पुमान् - .................

**पाठ्यचर्योद्देश्यम्।**

समस्तपदपरिचयसम्पादनम्।

**मानसिकव्यापारः**

आशयापग्रथनं, तारतम्यं, स्मरणं च।

समयः - 2 निमेषौ

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** समीचीनस्य उत्तरस्य एकः अङ्कः।

**उत्तरम् -** सौमित्रिः।

## 3. प्रश्ननिर्देशः।

उदाहरणानुसारं कर्मद्वयं किमिति निर्धार्य लिखत।

**प्रश्नपाठः - 3**

उदाहरणानुसारं वाक्यात् कर्मद्वयं किमिति निर्धार्य लिखत।

उदाः - कोसलराजपुत्रः त्वां कुशलम् अब्रवीत्।

कर्मद्वयम् - (1) त्वाम् (2) कुशलम्।

प्रश्नः - वनौकसामधिपः भवतीं भद्रम् अपृच्छत्।

(1)..................... (2).....................

**पाठ्यचर्योद्देश्यम्।**

द्विकर्मकधातूनां प्रयोगज्ञानम्।

**मानसिकव्यापारः**

अपग्रथनं, विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** एकैकस्य चयनाय एकैकोऽङ्कः।

**उत्तरम् -** भवतीम्, भद्रम्।

## 4. प्रश्ननिर्देशः।

प्रादेशिकभाषायां परिवर्त्य लिखतु।

**प्रश्नपाठः - 4**

सीतान्वेषणाय सुग्रीवाज्ञया हनूमान् समुद्रमुल्लङ्घ्य लङ्कां प्रविवेश। सीतां दृष्ट्वा रामनामाङ्कितमङ्गुलीयकम् तस्यै दत्वा सः स्वामिकल्पनां निरवहत्। एवं महात्मनः परार्थाय एव स्वजीवनं नयन्ति। तेषां स्वार्थत्याग एव अत्र प्रशंसनीयो भवति। ते तु शरीरेण मृता अपि कीर्तिशरीरेण जीवन्ति।

### पाठ्यचर्योद्देश्यम्।

भाषान्तरीकरणसामर्थ्यम्।

### मानसिकव्यापारः

अपग्रथनम्, आशयग्रहणं, समानपदचयनम्।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** उचितरीत्या भाषान्तरीकरणं कृतं चेत् एकैकस्य वाक्यस्य एकैकोऽङ्कः।

## 5. प्रश्ननिर्देशः, प्रश्नपाठश्च।

श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।

शिरसा तव सौमित्रिरकरोदभिवादनम्।
अपृच्छत्सोऽपि भद्रं त्वामधिपश्च वनौकसाम्।।

1. सौमित्रिः केन अभिवादनम् अकरोत्?
2. 'काननवासिनाम्' इत्यस्य समानार्थकपदं श्लोकात् चित्वा लिखत।
3. तत् + अनुसृत्य - तदनुसृत्य एवं चेत् - 'अकरोदभिवादनम्' - इत्यस्य पदच्छेदरूपं किम्?

### पाठ्यचर्योद्देश्यम्।

श्लोकानामाशयमवगच्छति।

**मानसिकव्यापारः**

अपग्रथनम्, आशयग्रहणं, विवेचनं च।

समयः - 6 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः** एकैकस्य उत्तरस्य एकैकोऽङ्कः।

**उत्तरम् -** 1. शिरस्सा।

2. वनौकसाम्।

3. अकरोत् + अभिवादनम्।

## 6. प्रश्ननिर्देशः।

अधोदत्तस्य श्लोकस्य लघुं गुरुं च निर्णीय गणानां नामानि लिखतु।

**प्रश्नपाठः - 4**

सङ्कल्पितं प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम्।

**पाठ्यचर्योद्देश्यम्।**

गुरुलघुविवेचनपूर्वकं गणनिर्णयज्ञानं सम्पादयति।

**मानसिकव्यापारः**

अपग्रथनं, विवेचनं, निर्णयः च।

समयः - 6 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** एकैकस्य पादस्य निर्णयनाय एकैकोऽङ्कः।

**उत्तरम् -**

त भ ज ज गु गु
— — U —UUU—UU —U— —
सङ्कल्पि/तं प्रथ/ममेव /मया त/वार्थे

त भ ज ज गु गु
— —U—UUU—UU—U — —
भर्तार/मात्मस/दृशं सु/कृतैर्ग/ता त्वम्।

# पाठः ११ कौमुद्याः त्यागः

## 1. प्रश्ननिर्देशः।

उदाहरणवाक्यं पठित्वा उचितपदं कोष्ठकात् स्वीकृत्य रिक्तस्थानं पूरयत।

**प्रश्नपाठः - 1**

उदाः - कौमुदी गान्धिमहाभागाय सुवर्णमालां अदात्।

बालिका ............................ दक्षिणां ददाति।

(आचार्यम् आचार्यस्य, आचार्याय)

**पाठ्यचर्योद्देश्यम्।**

प्रयोगविशेषज्ञानसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनम्, आशयग्रहणं, विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकः अङ्कः।

**उत्तरम् -** आचार्याय।

## 2. प्रश्ननिर्देशः।

सूचनां पठित्वा जीवनचरितं लिखत।

**प्रश्नपाठः - 2**

नाम - अरविन्दघोषः

जननम् - 1872 तमे वर्षे आगस्ट् मासे

जननस्थानम् - कालिघट् नगरम्

पिता - कृष्णधन् घोषः

विद्याभ्यासः - इङ्गलण्ड्देशे आङ्गलविद्याभ्यासः

योगदानम् - स्वातन्त्र्यान्दोलने भागभागित्वम्। पोण्डिच्चेरि देशे अरविन्दाश्रमस्थापनम्।

समाधिः - 1950 दिसम्बर् मासे

**पाठ्यचर्योद्देश्यम्।**

सूचना अधिकृत्य जीवनचरितलेखनसामर्थ्यं सम्पादयति।

**मानसिकव्यापारः**

आशयापग्रथनं, क्रमीकृत्य लेखनम्।

समयः - 10 निमेषाः

अङ्काः - 5

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | सूचनास्वीकाराय | - | 2 |
| | आशयपूर्णतायै | - | 2 |
| | वाक्यघटनायै | - | 1 |
| | **आहत्य** | - | **5** |

## 3. प्रश्ननिर्देशः।

उदाहरणानुसारं सन्धिच्छेदं कुरुत।

**प्रश्नपाठः - 3**

उदाः - सञ्चरन्नासीत् - सञ्चरन् + आसीत्।

उद्बोधयन्नासीत् - .................. + .......................।

**पाठ्यचर्योद्देश्यम्।**

पदानि सन्धातुं विघटयितुं च जानाति।

**मानसिकव्यापारः**

आशयग्रहणं, स्मरणं, विवेचनं च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** समीचीनस्य उत्तरस्य एकः अङ्कः।

**उत्तरम् -** उद्बोधयन् + आसीत्।

# एककम् - ६ चराचरप्रेमा
# पाठः १२ प्रकृतिनन्दिनी

## 1. प्रश्ननिर्देशः, प्रश्नपाठश्च।

सूचनामनुसृत्य कण्वस्य स्वभावविशेषमधिकृत्य लघूपन्यासं लिखत।

सूचनाः - शकुन्तलायाः पतिगृहगमनं - यात्रानुमतिः - कण्वस्य चिन्ता - पुत्रीस्नेहम्।

**पाठ्यचर्योद्देश्यम्।**

उपन्यासलेखनसामर्थ्यम्।

**मानसिकव्यापारः**

आशयापग्रथनं, स्मरणं, क्रमीकृत्य लेखनं च।

समयः - 10 निमेषाः

अङ्काः - 5

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | सूचनास्वीकाराय | - | 2 |
| | आशयपूर्णतायै | - | 2 |
| | उपन्यासस्वरूपाय | - | 1 |
| | **आहत्य** | - | **5** |

## 2. प्रश्ननिर्देशः, प्रश्नपाठश्च।

सूचनामुपयुज्य शकुन्तलायाः स्वभावमधिकृत्य पञ्चवाक्यानि लिखत।

सूचनाः - भर्तृगृहगमनम् - सखीनां विरहेण दुःखम् - चराचरप्रेम - यात्रानुमतिः - कण्वं प्रति वचनम्।

**पाठ्यचर्योद्देश्यम्।**

उपन्यासलेखनम्।

**मानसिकव्यापारः**

आशयापग्रथनं, स्मरणं, क्रमीकृत्य लेखनं च।

| | | |
|---|---|---|
| समयः | - | 10 निमेषाः |
| अङ्काः | - | 5 |

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनास्वीकाराय | - | 2 |
| आशयपूर्णतायै | - | 2 |
| उपन्यासस्वरूपाय | - | 1 |
| **आहत्य** | - | **5** |

## 3. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः - 3**

| | *अ* | *आ* |
|---|---|---|
| 1. | कालिदासः | उत्तररामचरितम् |
| 2. | भासः | मुद्राराक्षसम् |
| 3. | भवभूतिः | अभिज्ञानशाकुन्तलम् |
| 4. | विशाखदत्तः | स्वप्नवासवदत्तम् |
| | | आश्चर्यचूडामणिः। |

**पाठ्यचर्योद्देश्यम्।**

सांस्कारिकप्रगत्यै नाटककर्तॄणां योगदानं प्रत्यभिजानाति।

**मानसिकव्यापारः**

अपग्रथनम्, आशयग्रहणं, स्मरणं, विवेचनं च।

| | | |
|---|---|---|
| समयः | - | 4 निमेषाः |
| अङ्काः | - | 4 |

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| 1. | कालिदासः | अभिज्ञानशाकुन्तलम् |
| 2. | भासः | स्वप्नवासवदत्तम् |
| 3. | भवभूतिः | उत्तररामचरितम् |
| 4. | विशाखदत्तः | मुद्राराक्षसम्। |

## 4. प्रश्ननिर्देशः।

कः गणे नान्तर्भवति?

**प्रश्नपाठः - 4**

अनसूया, प्रियंवदा, वनज्योत्स्ना।

**पाठ्यचर्योद्देश्यम्।**

कथापात्राणां परिचयसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनं, स्मरणं, विवेचनं च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** समीचीनस्य उत्तरस्य एकः अङ्कः।

**उत्तरम् -** वनज्योत्स्ना।

# पाठः १३ सर्वधर्मसारः

## 1. प्रश्ननिर्देशः, प्रश्नपाठश्च।

'मोक्षप्राप्त्यर्थम् अनेके धर्माः सन्ति' - इत्याशयप्रतिपादकं श्लोकांशं चित्वा लिखत।

- अलिन्दारोहणे पुंसां
  श्रेणिका बहुधा भवेत्।
- एवं मुक्तिपदारोहे
  सन्ति धर्मा ह्यनेकशः।
- नद्यः सर्वा प्रसृत्यान्ते
  सागरं प्रविशन्ति तु।।

**पाठ्यचर्योद्देश्यम्।**

श्लोकं पठित्वा आशयम् अवगच्छति।

**मानसिकव्यापारः**

आशयापग्रथनं, विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** समीचीनस्य उत्तरस्य एकः अङ्कः।

**उत्तरम् -** एवं मुक्तिपदारोहे

सन्ति धर्मा ह्यनेकशः।।

## 2. प्रश्ननिर्देशः, प्रश्नपाठश्च।

पद्यं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।

तन्त्रेऽपि सच्चिदानन्दशिव एव महाप्रभुः।

एकलक्ष्याः समे धर्माः किं वात्र विशयास्पदम्।।

1. तन्त्रशास्त्रेष्वपि प्रकीर्तितः महाप्रभुः कः ?
2. 'संशयास्पदम्' इत्यार्थसूचकं पदं श्लोकात् चित्वा लिखत।
3. स्थानेऽत्र - स्थाने + अत्र। एवं चेत् तन्त्रेऽपि।

**पाठ्यचर्योद्देश्यम्।**

श्लोकं पठित्वा आशयमवगच्छति।

**मानसिकव्यापारः**

आशयापग्रथनं, स्मरणं, विवेचनं च।

समयः - 6 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः** एकैकस्य उत्तरस्य एकैकोऽङ्कः।

**उत्तरम् -**
1. सच्चिदानन्दशिवः।
2. विशयास्पदम्।
3. तन्त्रे + अपि।

## 3. प्रश्ननिर्देशः, प्रश्नपाठश्च।

उदाहरणानुसारं विग्रहवाक्यं लिखत।

उदाः - यथाशक्ति - शक्तिम् अनतिक्रम्य।

यथास्पृष्टम् - ........................................................

**पाठ्यचर्योद्देश्यम्।**

समस्तपदं परिचिनोति।

**मानसिकव्यापारः**

अपग्रथनं, तुलनं च।

समयः - 2 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** एकस्य उत्तरस्य एकः अङ्कः।

**उत्तरम् -** स्पृष्टम् अनतिक्रम्य।

## 4. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः - 4**

| *अ* | *आ* |
|---|---|
| 1. धर्मसागरः | डॉ. के.एन्. एषुत्तच्छन् |
| 2. विशाखविजयम् | प्रो. ए.आर्. राजराजवर्मा |
| 3. केरलोदयम् | केरलवर्मा वलियकोयित्तम्पुरान् |
| 4. आङ्गलसाम्राज्यम् | डॉ. पी.के. नारायणपिल्ला |
| | श्रीनारायणगुरुः। |

**पाठ्यचर्योद्देश्यम्।**

केरलीयमहाकवीनां काव्यानि ज्ञात्वा यथोचितलेखनम्।

**मानसिकव्यापारः**

अपग्रथनं, स्मरणं, विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| 1. | धर्मसागरः | डॉ. पी.के. नारायणपिल्ला |
| 2. | विशाखविजयम् | केरलवर्मा वलियकोयित्तम्पुरान् |
| 3. | केरलोदयम् | डॉ. के.एन्. एषुत्तच्छन् |
| 4. | आङ्गलसाम्राज्यम् | प्रो. ए.आर्. राजराजवर्मा। |

# एककम् - ७ नीतिरूत अनीतिः

# पाठः १४ शम्बूकवृत्तान्तः

## 1. प्रश्ननिर्देशः।

उचितपदं स्वीकृत्य रिक्तस्थानं पूरयतु।

**प्रश्नपाठः - 1**

रामः .................... सह अयोध्यां प्राप। (सीतायाः, सीताम्, सीतया)

**पाठ्यचर्योद्देश्यम्।**

प्रयोगविशेषं जानाति।

**मानसिकव्यापारः**

अपग्रथनं, स्मरणं, विवेचनं च।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** समीचीनस्य उत्तरस्य एकः अङ्कः।

**उत्तरम् -** सीतया।

## 2. प्रश्ननिर्देशः।

ल्यबन्तानि अव्ययपदानि निर्धार्य लिखत।

**प्रश्नपाठः - 2**

नीत्या, आदाय, आरुह्य, शूद्रस्य, पर्वतीकृत्य, विज्ञाय

**पाठ्यचर्योद्देश्यम्।**

अव्ययपदान् परिचिनोति।

**मानसिकव्यापारः**

अपग्रथनं, स्मरणम्, विवेचनं च।

समयः - 4 निमेषाः

अङ्कः - 2

**मूल्यनिर्णयसूचकाः** एकैकस्योत्तरस्य अर्धाङ्कः।

**उत्तरम् -** आदाय, आरुह्य, पर्वतीकृत्य, विज्ञाय।